# श्रीमद्भागवत रसिक कुटुंब

## शिव सहस्रनाम स्तोत्रम्

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

श्री वासुदेव उवाच ।

ततः स प्रयतो भूत्वा, मम तात युधिष्ठिर ।

प्रांजलिः प्राह विप्रर्षि-र्नामसंग्रहमादितः ॥ 1 ॥

उपमन्युरुवाच ।

ब्रह्मप्रोक्तैर्ऋषिप्रोक्तै-र्वेदवेदांगसंभवैः ।

सर्वलोकेषु विख्यातं, स्तुत्यं स्तोष्यामि नामभिः ॥ 2 ॥

महद्भिर्विहितैः सत्यैः, सिद्धैः सर्वार्थसाधकैः ।

ऋषिणा तंडिना भक्त्या, कृतैर्वेदकृतात्मना ॥ 3 ॥

यथोक्तैः साधुभिः ख्यातै-र्मुनिभिस्तत्त्वदर्शिभिः ।

प्रवरं प्रथमं स्वर्ग्यं, सर्वभूतहितं शुभम् ॥ 4 ॥

श्रुतैः सर्वत्र जगति, ब्रह्मलोकावतारितैः ।

सत्यैस्तत्परमं ब्रह्म, ब्रह्मप्रोक्तं सनातनम् ॥ 5 ॥

वक्ष्ये यदुकुलश्रेष्ठ, शृणुष्वावहितो मम ।
वरयैनं भवं देवं, भक्तस्त्वं परमेश्वरम् ॥ 6 ॥

तेन ते श्रावयिष्यामि, यत्तद्ब्रह्म सनातनम् ।
न शक्यं विस्तरात्कृत्स्नं, वक्तुं सर्वस्य केनचित् ॥ 7 ॥

युक्तेनापि विभूतीना-मपि वर्षशतैरपि ।
यस्यादिर्मध्यमंतं च, सुरैरपि न गम्यते ॥ 8 ॥

कस्तस्य शक्नुयाद्वक्तुं, गुणान् कार्त्स्न्येन माधव ।
किं तु देवस्य महतः, संक्षिप्तार्थपदाक्षरम् ॥ 9 ॥

शक्तितश्चरितं वक्ष्ये, प्रसादात्तस्य धीमतः ।
अप्राप्य तु ततोऽनुज्ञां, न शक्यः स्तोतुमीश्वरः ॥ 10 ॥

यदा तेनाभ्यनुज्ञातः, स्तुतो वै स तदा मया ।
अनादिनिधनस्याहं, जगद्योनेर्महात्मनः ॥ 11 ॥

नाम्नां किंचित्समुद्देशं, वक्ष्याम्यव्यक्तयोनिनः ।
वरदस्य वरेण्यस्य, विश्वरूपस्य धीमतः ॥ 12 ॥

शृणु नाम्नां च यं कृष्ण, यदुक्तं पद्मयोनिना ।
दशनामसहस्राणि, यान्याह प्रपितामहः ॥ 13 ॥

तानि निर्मथ्य मनसा, दध्नो घृतमिवोद्धृतम् ।
गिरेः सारं यथा हेम, पुष्पसारं यथा मधु ॥ 14 ॥

घृतात्सारं यथा मंड-स्तथैतत्सारमुद्धृतम् ।
सर्वपापापहमिदं, चतुर्वेदसमन्वितम् ॥ 15 ॥

प्रयत्नेनाधिगंतव्यं, धार्यं च प्रयतात्मना ।
मांगल्यं पौष्टिकं चैव, रक्षोघ्नं पावनं महत् ॥ 16 ॥

इदं भक्ताय दातव्यं, श्रद्दधानास्तिकाय च ।
नाश्रद्दधानरूपाय, नास्तिकायाजितात्मने ॥ 17 ॥

यश्चाभ्यसूयते देवं, कारणात्मानमीश्वरम् ।
स कृष्ण नरकं याति, सह पूर्वैः सहात्मजैः ॥ 18 ॥

इदं ध्यानमिदं योग-मिदं ध्येयमनुत्तमम् ।
इदं जप्यमिदं ज्ञानं, रहस्यमिदमुत्तमम् ॥ 19 ॥

यं ज्ञात्वा अंतकालेपि, गच्छेत परमां गतिम् ।
पवित्रं मंगलं मेध्यं, कल्याणमिदमुत्तमम् ॥ 20 ॥

इदं ब्रह्मा पुरा कृत्वा, सर्वलोकपितामहः ।
सर्व स्तवानां राजत्वे, दिव्यानां समकल्पयत् ॥ 21 ॥

तदा प्रभृति चैवाय-मीश्वरस्य महात्मनः ।
स्तवराज इति ख्यातो, जगत्यमरपूजितः ॥ 22 ॥

ब्रह्मलोकादयं स्वर्गे, स्तवराजोऽवतारितः ।
यतस्तंडिः पुरा प्राप, तेन तंडिकृतोऽभवत् ॥ 23 ॥

स्वर्गाच्चैवात्र भूर्लोकं, तंडिना ह्यवतारितः ।
सर्वमंगलमांगल्यं, सर्वपापप्रणाशनम् ॥ 24 ॥

निगदिष्ये महाबाहो, स्तवानामुत्तमं स्तवम् ।
ब्रह्मणामपि यद्ब्रह्म, पराणामपि यत्परम् ॥ 25 ॥

तेजसामपि यत्तेज-स्तपसामपि यत्तपः ।
शांतानामपि यः शांतो, द्युतीनामपि या द्युतिः ॥ 26 ॥

दांतानामपि यो दांतो, धीमतामपि या च धीः ।
देवानामपि यो देव, ऋषीणामपि यस्त्वृषिः ॥ 27 ॥

यज्ञानामपि यो यज्ञः, शिवानामपि यः शिवः ।
रुद्राणामपि यो रुद्रः, प्रभा प्रभवतामपि ॥ 28 ॥

योगिनामपि यो योगी, कारणानां च कारणम् ।
यतो लोकाः संभवंति, न भवंति यतः पुनः ॥ 29 ॥

सर्वभूतात्मभूतस्य, हरस्यामिततेजसः ।
अष्टोत्तरसहस्रं तु, नाम्नां शर्वस्य मे शृणु ।
यच्छ्रुत्वा मनुजव्याघ्र, सर्वान्कामानवाप्स्यसि ॥ 30 ॥

ॐ अस्य श्री सदाशिवसहस्रनामस्तोत्र महामन्त्रस्य ।
उपमन्यु ऋषिः। अननुष्टुप् छन्दः । श्री सांबसदाशिवो देवता।
स्थिरः स्थाणुऋति बीजम्। श्रीमान् श्रीवर्धनो जगदिति शक्तिः । देवाधिपति ऋति कीलकम् ।
श्री सांबसदाशिव प्रसाद सिध्यर्थे पारायणे विनियोगः ॥

**ध्यानम् ।**

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वहां (म्)
विश्वाद्यं विश्वबज्रं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥
शांतं पद्मासनस्थं शशिधरमुकुटं पंचवक्त्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहंतम् ।
नागं पाशं च घंटां प्रलयहुतवहं सांकुशं वामभागे
नानालंकारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥

**अथ सहस्रनाम स्तोत्रम् ।**

ॐ स्थिरः स्थाणुः प्रभुर्भीमः, प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः, सर्वः सर्वकरो भवः ॥ 1 ॥

जटी चर्मी शिखंडी च, सर्वांगः सर्वभावनः ।
हरश्च हरिणाक्षश्च, सर्वभूतहरः प्रभुः ॥ 2 ॥

प्रवृत्तिश्च निवृत्तिश्च, नियतः शाश्वतो ध्रुवः ।
श्मशानवासी भगवान्, खचरो गोचरोऽर्दनः ॥ 3 ॥

अभिवाद्यो महाकर्मा, तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नः, सर्वलोकप्रजापतिः ॥ 4 ॥

महारूपो महाकायो, वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा, विश्वरूपो महाहनुः ॥ 5 ॥

लोकपालोऽन्तर्हितात्मा, प्रसादो हयगर्दभिः ।
पवित्रं च महांश्चैव, नियमो नियमाश्रितः ॥ 6 ॥

सर्वकर्मा स्वयंभूत, आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः, सोमो नक्षत्रसाधकः ॥ 7 ॥

चंद्रः सूर्यः शनिः केतु-र्ग्रहो ग्रहपतिर्वरः ।
अत्रिरत्र्या नमस्कर्ता, मृगबाणार्पणोऽनघः ॥ 8 ॥

महातपा घोरतपा, अदीनो दीनसाधकः ।
संवत्सरकरो मंत्रः, प्रमाणं परमं तपः ॥ 9 ॥

योगी योज्यो महाबीजो, महारेता महाबलः ।
सुवर्णरेताः सर्वज्ञः, सुबीजो बीजवाहनः ॥ 10 ॥

दशबाहुस्त्वनिमिषो, नीलकंठ उमापतिः ।
विश्वरूपः स्वयं श्रेष्ठो, बलवीरो बलो गणः ॥ 11 ॥

गणकर्ता गणपति-र्दिग्वासाः काम एव च ।
मंत्रवित्परमो मंत्रः, सर्वभावकरो हरः ॥ 12 ॥

कमंडलुधरो धन्वी, बाणहस्तः कपालवान् ।
अशनी शतघ्नी खड्गी, पट्टिशी चायुधी महान् ॥ 13 ॥

स्रुवहस्तः सुरूपश्च, तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च, उदग्रो विनतस्तथा ॥ 14 ॥

दीर्घश्च हरिकेशश्च, सुतीर्थः कृष्ण एव च ।
सृगालरूपः सिद्धार्थो, मुंडः सर्वशुभंकरः ॥ 15 ॥

अजश्च बहुरूपश्च, गंधधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिंग, ऊर्ध्वशायी नभःस्थलः ॥ 16 ॥

त्रिजटी चीरवासाश्च, रुद्रः सेनापतिर्विभुः ।
अहश्चरो नक्तंचर-स्तिग्ममन्युः सुवर्चसः ॥ 17 ॥

गजहा दैत्यहा कालो, लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च, आर्द्रचर्मांबरावृतः ॥ 18 ॥

कालयोगी महानादः, सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतचारी, भूतचारी महेश्वरः ॥ 19 ॥

बहुभूतो बहुधरः, स्वर्भानुरमितो गतिः ।
नृत्यप्रियो नित्यनर्तो, नर्तकः सर्वलालसः ॥ 20 ॥

घोरो महातपाः पाशो, नित्यो गिरिरुहो नभः ।
सहस्रहस्तो विजयो, व्यवसायो ह्यतंद्रितः ॥ 21 ॥

अधर्षणो धर्षणात्मा, यज्ञहा कामनाशकः
दक्षयागापहारी च, सुसहो मध्यमस्तथा ॥ 22 ॥

तेजोपहारी बलहा, मुदितोऽर्थोऽजितोऽवरः ।
गंभीरघोषो गंभीरो, गंभीरबलवाहनः ॥ 23 ॥

न्यग्रोधरूपो न्यग्रोधो, वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैव, महाकायो महाननः ॥ 24 ॥

विष्वक्सेनो हरिर्यज्ञः, संयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः, सहायः कर्मकालवित् ॥ 25 ॥

विष्णुप्रसादितो यज्ञः, समुद्रो बडबामुखः ।
हुताशनसहायश्च, प्रशांतात्मा हुताशनः ॥ 26 ॥

उग्रतेजा महातेजा, जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः, सर्वविग्रह एव च ॥ 27 ॥

शिखी मुंडी जटी ज्वाली, मूर्तिजो मूर्धगो बली ।
वेणवी पणवी ताली, खली कालकटंकटः ॥ 28 ॥

नक्षत्रविग्रहमति-र्गुणबुद्धिर्लयोऽगमः ।
प्रजापतिर्विश्वबाहु-र्विभागः सर्वगोऽमुखः ॥ 29 ॥

विमोचनः सुसरणो, हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च, महीचारी स्रुतस्तथा ॥ 30 ॥

सर्वतूर्यनिनादी च, सर्वातोद्यपरिग्रहः ।
व्यालरूपो गुहावासी, गुहो माली तरंगवित् ॥ 31 ॥

त्रिदशस्त्रिकालधृक्कर्म, सर्वबंधविमोचनः ।
बंधनस्त्वसुरेंद्राणां, युधिशत्रुविनाशनः ॥ 32 ॥

सांख्यप्रसादो दुर्वासाः, सर्वसाधुनिषेवितः ।
प्रस्कंदनो विभागज्ञो, अतुल्यो यज्ञभागवित् ॥ 33 ॥

सर्ववासः सर्वचारी, दुर्वासा वासवोऽमरः ।
हैमो हेमकरोऽयज्ञः, सर्वधारी धरोत्तमः ॥ 34 ॥

लोहिताक्षो महाक्षश्च, विजयाक्षो विशारदः ।
संग्रहो निग्रहः कर्ता, सर्पचीरनिवासनः ॥ 35 ॥

मुख्योऽमुख्यश्च देहश्च, काहलिः सर्वकामदः ।
सर्वकालप्रसादश्च, सुबलो बलरूपधृत् ॥ 36 ॥

सर्वकामवरश्चैव, सर्वदः सर्वतोमुखः ।
आकाशनिर्विरूपश्च, निपाती ह्यवशः खगः ॥ 37 ॥

रौद्ररूपोंऽशुरादित्यो, बहुरश्मिः सुवर्चसी ।
वसुवेगो महावेगो, मनोवेगो निशाचरः ॥ 38 ॥

सर्ववासी श्रियावासी, उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः, संभग्नश्च सहस्रदः ॥ 39 ॥

पक्षी च पक्षरूपश्च, अतिदीप्तो विशां पतिः ।
उन्मादो मदनः कामो, ह्यश्वत्थोऽर्थकरो यशः ॥ 40 ॥

वामदेवश्च वामश्च, प्राग्दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च, सिद्धार्थः सिद्धसाधकः ॥ 41 ॥

भिक्षुश्च भिक्षुरूपश्च, विपणो मृदुरव्ययः ।
महासेनो विशाखश्च, षष्टिभागो गवां पतिः ॥ 42 ॥

वज्रहस्तश्च विष्कंभी, चमूस्तंभन एव च ।
वृत्तावृत्तकरस्तालो, मधुर्मधुकलोचनः ॥ 43 ॥

वाचस्पत्यो वाजसनो, नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी, सर्वचारी विचारवित् ॥ 44 ॥

ईशान ईश्वरः कालो, निशाचारी पिनाकभृत् ।
निमित्तस्थो निमित्तं च, नंदिर्नंदिकरो हरिः ॥ 45 ॥

नंदीश्वरश्च नंदी च, नंदनो नंदिवर्धनः ।
भगहारी निहंता च, कालो ब्रह्मा पितामहः ॥ 46 ॥

चतुर्मुखो महालिंग-श्चारुलिंगस्तथैव च ।
लिंगाध्यक्षः सुराध्यक्षो, योगाध्यक्षो युगावहः ॥ 47 ॥

बीजाध्यक्षो बीजकर्ता, अध्यात्मानुगतो बलः ।
इतिहासः सकल्पश्च, गौतमोऽथ निशाकरः ॥ 48 ॥

दंभो ह्यदंभो वैदंभो, वश्यो वशकरः कलिः ।
लोककर्ता पशुपति-र्महाकर्ता ह्यनौषधः ॥ 49 ॥

अक्षरं परमं ब्रह्म, बलवच्छक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा, शुद्धो मान्यो गतागतः ॥ 50 ॥

बहुप्रसादः सुस्वप्नो, दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मंत्रकारो, विद्वान् समरमर्दनः ॥ 51 ॥

महामेघनिवासी च, महाघोरो वशीकरः ।
अग्निज्वालो महाज्वालो, अतिधूम्रो हुतो हविः ॥ 52 ॥

वृषणः शंकरो नित्य-वर्चस्वी धूमकेतनः ।
नीलस्तथांगलुब्धश्च, शोभनो निरवग्रहः ॥ 53 ॥

स्वस्तिदः स्वस्तिभावश्च, भागी भागकरो लघुः ।
उत्संगश्च महांगश्च, महागर्भपरायणः ॥ 54 ॥

कृष्णवर्णः सुवर्णश्च, इंद्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो, महाकायो महायशाः ॥ 55 ॥

महामूर्धा महामात्रो, महानेत्रो निशालयः ।
महांतको महाकर्णो, महोष्ठश्च महाहनुः ॥ 56 ॥

महानासो महाकंबु-र्महाग्रीवः श्मशानभाक् ।
महावक्षा महोरस्को, ह्यंतरात्मा मृगालयः ॥ 57 ॥

लंबनो लंबितोष्ठश्च, महामायः पयोनिधिः ।
महादंतो महादंष्ट्रो, महाजिह्वो महामुखः ॥ 58 ॥

महानखो महारोमा, महाकेशो महाजटः ।
प्रसन्नश्च प्रसादश्च, प्रत्ययो गिरिसाधनः ॥ 59 ॥

स्नेहनोऽस्नेहनश्चैव, अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतु-रनलो वायुवाहनः ॥ 60 ॥

गंडली मेरुधामा च, देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य, ऋक्सहस्रामितेक्षणः ॥ 61 ॥

यजुः पादभुजो गुह्यः, प्रकाशो जंगमस्तथा ।
अमोघार्थः प्रसादश्च, अभिगम्यः सुदर्शनः ॥ 62 ॥

उपकारः प्रियः सर्वः, कनकः कांचनच्छविः ।
नाभिर्नंदिकरो भावः, पुष्करस्थपतिः स्थिरः ॥ 63 ॥

द्वादशस्त्रासनश्चाद्यो, यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च, मकरः कालपूजितः ॥ 64 ॥

सगणो गणकारश्च, भूतवाहनसारथिः ।
भस्मशयो भस्मगोप्ता, भस्मभूतस्तरुर्गणः ॥ 65 ॥

लोकपालस्तथाऽलोको, महात्मा सर्वपूजितः ।
शुक्लस्त्रिशुक्लः संपन्नः, शुचिर्भूतनिषेवितः ॥ 66 ॥

आश्रमस्थः क्रियावस्थो, विश्वकर्ममतिर्वरः ।
विशालशाखस्ताम्रोष्ठो, ह्यंबुजालः सुनिश्चलः ॥ 67 ॥

कपिलः कपिशः शुक्ल, आयुश्चैव परोऽपरः ।
गंधर्वो ह्यदितिस्तार्क्ष्यः, सुविज्ञेयः सुशारदः ॥ 68 ॥

परश्वधायुधो देवो, ह्यनुकारी सुबांधवः ।
तुंबवीणो महाक्रोध, ऊर्ध्वरेता जलेशयः ॥ 69 ॥

उग्रो वंशकरो वंशो, वंशनादो ह्यनिंदितः ।
सर्वांगरूपो मायावी, सुहृदो ह्यनिलोऽनलः ॥ 70 ॥

बंधनो बंधकर्ता च, सुबंधनविमोचनः ।
स यज्ञारिः स कामारि-र्महादंष्ट्रो महायुधः ॥ 71 ॥

बहुधा निंदितः शर्वः, शंकरः शंकरोऽधनः ।
अमरेशो महादेवो, विश्वदेवः सुरारिहा ॥ 72 ॥

अहिर्बुध्न्योऽनिलाभश्च, चेकितानो हविस्तथा ।
अजैकपाच्च कापाली, त्रिशंकुरजितः शिवः ॥ 73 ॥

धन्वंतरिर्धूमकेतुः, स्कंदो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च, मित्रस्त्वष्टा ध्रुवो धरः ॥ 74 ॥

प्रभावः सर्वगो वायु-रर्यमा सविता रविः ।
उषंगुश्च विधाता च, मांधाता भूतभावनः ॥ 75 ॥

विभुर्वर्णविभावी च, सर्वकामगुणावहः ।
पद्मनाभो महागर्भ-श्चंद्रवक्त्रोऽनिलोऽनलः ॥ 76 ॥

बलवांश्चोपशांतश्च, पुराणः पुण्यचंचुरी ।
कुरुकर्ता कुरुवासी, कुरुभूतो गुणौषधः ॥ 77 ॥

सर्वाशयो दर्भचारी, सर्वेषां प्राणिनां पतिः ।
देवदेवः सुखासक्तः, सदसत्सर्वरत्नवित् ॥ 78 ॥

कैलासगिरिवासी च, हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता, बहुविद्यो बहुप्रदः ॥ 79 ॥

वणिजो वर्धकी वृक्षो, वकुलश्चंदनश्छदः ।
सारग्रीवो महाजत्रु-रलोलश्च महौषधः ॥ 80 ॥

सिद्धार्थकारी सिद्धार्थ-श्छंदोव्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः, सिंहगः सिंहवाहनः ॥ 81 ॥

प्रभावात्मा जगत्काल-स्थालो लोकहितस्तरुः ।
सारंगो नवचक्रांगः, केतुमाली सभावनः ॥ 82 ॥

भूतालयो भूतपति-रहोरात्रमनिंदितः ॥ 83 ॥

वाहिता सर्वभूतानां, निलयश्च विभुर्भवः ।
अमोघः संयतो ह्यश्वो, भोजनः प्राणधारणः ॥ 84 ॥

धृतिमान् मतिमान् दक्षः, सत्कृतश्च युगाधिपः ।
गोपालिर्गोपतिर्ग्रामो, गोचर्मवसनो हरिः ॥ 85 ॥

हिरण्यबाहुश्च तथा, गुहापालः प्रवेशिनाम् ।
प्रकृष्टारिर्महाहर्षो, जितकामो जितेंद्रियः ॥ 86 ॥

गांधारश्च सुवासश्च, तपःसक्तो रतिर्नरः ।
महागीतो महानृत्यो, ह्यप्सरोगणसेवितः ॥ 87 ॥

महाकेतुर्महाधातु-र्नैकसानुचरश्चलः ।
आवेदनीय आदेशः, सर्वगंधसुखावहः ॥ 88 ॥

तोरणस्तारणो वातः, परिधी पतिखेचरः ।
संयोगो वर्धनो वृद्धो, अतिवृद्धो गुणाधिकः ॥ 89 ॥

नित्य आत्मसहायश्च, देवासुरपतिः पतिः ।
युक्तश्च युक्तबाहुश्च, देवो दिविसुपर्वणः ॥ 90 ॥

आषाढश्च सुषाढश्च, ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो, वसुश्रेष्ठो महापथः ॥ 91 ॥

शिरोहारी विमर्शश्च, सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च, सर्वयोगी महाबलः ॥ 92 ॥

समाम्नायोऽसमाम्नाय-स्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मंत्रः, शुभाक्षो बहुकर्कशः ॥ 93 ॥

रत्नप्रभूतो रक्तांगो, महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो, व्यक्ताव्यक्तस्तपोनिधिः ॥ 94 ॥

आरोहणोऽधिरोहश्च, शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो, योगो योगकरो हरिः ॥ 95 ॥

युगरूपो महारूपो, महानागहनो वधः ।
न्यायनिर्वपणः पादः, पंडितो ह्यचलोपमः ॥ 96 ॥

बहुमालो महामालः, शशी हरसुलोचनः ।
विस्तारो लवणः कूप-स्त्रियुगः सफलोदयः ॥ 97 ॥

त्रिलोचनो विषण्णांगो, मणिविद्धो जटाधरः ।
बिंदुर्विसर्गः सुमुखः, शरः सर्वायुधः सहः ॥ 98 ॥

निवेदनः सुखाजातः, सुगंधारो महाधनुः ।
गंधपाली च भगवा-नुत्थानः सर्वकर्मणाम् ॥ 99 ॥

मंथानो बहुलो वायुः, सकलः सर्वलोचनः ।
तलस्तालः करस्थाली, ऊर्ध्वसंहननो महान् ॥ 100 ॥

छत्रं सुच्छत्रो विख्यातो, लोकः सर्वाश्रयः क्रमः ।
मुंडो विरूपो विकृतो, दंडी कुंडी विकुर्वणः ॥ 101 ॥

हर्यक्षः ककुभो वज्री, शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेंद्रः, सर्वदेवमयो गुरुः ॥ 102 ॥

सहस्रबाहुः सर्वांगः, शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मंत्रः, कनिष्ठः कृष्णपिंगलः ॥ 103 ॥

ब्रह्मदंडविनिर्माता, शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो, ब्रह्मगर्भो जलोद्भवः ॥ 104 ॥

गभस्तिर्ब्रह्मकृद्ब्रह्मी, ब्रह्मविद्ब्राह्मणो गतिः ।
अनंतरूपो नैकात्मा, तिग्मतेजाः स्वयंभुवः ॥ 105 ॥

ऊर्ध्वगात्मा पशुपति-र्वातरंहा मनोजवः ।
चंदनी पद्मनालाग्रः, सुरभ्युत्तरणो नरः ॥ 106 ॥

कर्णिकारमहास्रग्वी, नीलमौलिः पिनाकधृत् ।
उमापतिरुमाकांतो, जाह्नवीधृदुमाधवः ॥ 107 ॥

वरो वराहो वरदो, वरेण्यः सुमहास्वनः ।
महाप्रसादो दमनः, शत्रुहा श्वेतपिंगलः ॥ 108 ॥

पीतात्मा परमात्मा च, प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो, धर्मसाधारणो वरः ॥ 109 ॥

चराचरात्मा सूक्ष्मात्मा, अमृतो गोवृषेश्वरः ।
साध्यर्षिर्वसुरादित्यो, विवस्वान्सवितामृतः ॥ 110 ॥

व्यासः सर्गः सुसंक्षेपो, विस्तरः पर्ययो नरः ।
ऋतुः संवत्सरो मासः, पक्षः संख्यासमापनः ॥ 111 ॥

कला काष्ठा लवा मात्रा, मुहूर्ताहः क्षपाः क्षणाः ।
विश्वक्षेत्रं प्रजाबीजं, लिंगमाद्यस्तु निर्गमः ॥ 112 ॥

सदसद्व्यक्तमव्यक्तं, पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं, मोक्षद्वारं त्रिविष्टपम् ॥ 113 ॥

निर्वाणं ह्लादनश्चैव, ब्रह्मलोकः परा गतिः ।
देवासुरविनिर्माता, देवासुरपरायणः ॥ 114 ॥

देवासुरगुरुर्देवो, देवासुरनमस्कृतः ।
देवासुरमहामात्रो, देवासुरगणाश्रयः ॥ 115 ॥

देवासुरगणाध्यक्षो, देवासुरगणाग्रणीः ।
देवादिदेवो देवर्षि-र्देवासुरवरप्रदः ॥ 116 ॥

देवासुरेश्वरो विश्वो, देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिंत्यो, देवतात्माऽऽत्मसंभवः ॥ 117 ॥

उद्भित्त्रिविक्रमो वैद्यो, विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो, देवसिंहो नरर्षभः ॥ 118 ॥

विबुधोऽग्रवरः सूक्ष्मः, सर्वदेवस्तपोमयः ।
सुयुक्तः शोभनो वज्री, प्रासानां प्रभवोऽव्ययः ॥ 119 ॥

गुहः कांतो निजः सर्गः, पवित्रं सर्वपावनः ।
श्रृंगी श्रृंगप्रियो बभ्रू, राजराजो निरामयः ॥ 120 ॥

अभिरामः सुरगणो, विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो, हरिणो ब्रह्मवर्चसः ॥ 121 ॥

स्थावराणां पतिश्चैव, नियमेंद्रियवर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽ-चिंत्यः सत्यव्रतः शुचिः ॥ 122 ॥

व्रताधिपः परं ब्रह्म, भक्तानां परमा गतिः ।
विमुक्तो मुक्ततेजाश्च, श्रीमान् श्रीवर्धनो जगत् ॥ 123 ॥

**(फलश्रृति)**

यथा प्रधानं भगवा-निति भक्त्या स्तुतो मया ।
यं न ब्रह्मादयो देवा, विदुस्तत्त्वेन नर्षयः ॥ 1 ॥

स्तोतव्यमर्च्यं वंद्यं च, कः स्तोष्यति जगत्पतिम् ।
भक्त्या त्वेवं पुरस्कृत्य, मया यज्ञपतिर्विभुः ॥ 2 ॥

ततोऽभ्यनुज्ञां संप्राप्य, स्तुतो मतिमतां वरः ।
शिवमेभिः स्तुवन् देवं, नामभिः पुष्टिवर्धनैः ॥ 3 ॥

एतद्धि परमं ब्रह्म, परं ब्रह्माधिगच्छति ।
ऋषयश्चैव देवाश्च, स्तुवंत्येतेन तत्परम् ॥ 4 ॥

स्तूयमानो महादेव-स्तुष्यते नियतात्मभिः ।
भक्तानुकंपी भगवा-नात्मसंस्थाकरो विभुः ॥ 5 ॥

तथैव च मनुष्येषु, ये मनुष्याः प्रधानतः ।
आस्तिकाः श्रद्दधानाश्च, बहुभिर्जन्मभिः स्तवैः ॥ 6 ॥

भक्त्या ह्यनन्यमीशानं, परं देवं सनातनम् ।
कर्मणा मनसा वाचा, भावेनामिततेजसः ॥ 7 ॥

शयाना जाग्रमाणाश्च, व्रजन्नुपविशंस्तथा ।
उन्मिषन्निमिषंश्चैव, चिंतयंतः पुनः पुनः ॥ 8 ॥

श्रृण्वंतः श्रावयंतश्च, कथयंतश्च ते भवम् ।
स्तुवंतः स्तूयमानाश्च, तुष्यंति च रमंति च ॥ 9 ॥

जन्मकोटिसहस्रेषु, नानासंसारयोनिषु ।
जंतोर्विगतपापस्य, भवे भक्तिः प्रजायते ॥ 10 ॥

उत्पन्ना च भवे भक्ति-रनन्या सर्वभावतः ।
भाविनः कारणे चास्य, सर्वयुक्तस्य सर्वथा ॥ 11 ॥

एतद्देवेषु दुष्प्रापं, मनुष्येषु न लभ्यते ।
निर्विघ्ना निश्चला रुद्रे, भक्तिरव्यभिचारिणी ॥ 12 ॥

तस्यैव च प्रसादेन, भक्तिरुत्पद्यते नृणाम् ।
येन यांति परां सिद्धिं, तद्भावगतचेतसः ॥ 13 ॥

ये सर्वभावानुगताः, प्रपद्यंते महेश्वरम् ।
प्रपन्नवत्सलो देवः, संसारात्तान्समुद्धरेत् ॥ 14 ॥

एवमन्ये विकुर्वंति, देवाः संसारमोचनम् ।
मनुष्याणामृते देवं, नान्या शक्तिस्तपोबलम् ॥ 15 ॥

इति तेनेंद्रकल्पेन, भगवान् सदसत्पतिः ।
कृत्तिवासाः स्तुतः कृष्ण, तंडिना शुभबुद्धिना ॥ 16 ॥

स्तवमेतं भगवतो, ब्रह्मा स्वयमधारयत् ।
गीयते च स बुद्ध्येत, ब्रह्मा शंकरसन्निधौ ॥ 17 ॥

इदं पुण्यं पवित्रं च, सर्वदा पापनाशनम् ।
योगदं मोक्षदं चैव, स्वर्गदं तोषदं तथा ॥ 18 ॥

एवमेतत्पठंते य, एकभक्त्या तु शंकरम् ।
या गतिः सांख्ययोगानां, व्रजंत्येतां गतिं तदा ॥ 19 ॥

स्तवमेतं प्रयत्नेन, सदा रुद्रस्य सन्निधौ ।
अब्दमेकं चरेद्भक्तः, प्राप्नुयादीप्सितं फलम् ॥ 20 ॥

एतद्रहस्यं परमं, ब्रह्मणो हृदि संस्थितम् ।
ब्रह्मा प्रोवाच शक्राय, शक्रः प्रोवाच मृत्यवे ॥ 21 ॥

मृत्युः प्रोवाच रुद्रेभ्यो, रुद्रेभ्यस्तंडिमागमत् ।
महता तपसा प्राप्त-स्तंडिना ब्रह्मसद्मनि ॥ 22 ॥

तंडिः प्रोवाच शुक्राय, गौतमाय च भार्गवः ।
वैवस्वताय मनवे, गौतमः प्राह माधव ॥ 23 ॥

नारायणाय साध्याय, समाधिष्ठाय धीमते ।
यमाय प्राह भगवान्, साध्यो नारायणोऽच्युतः ॥ 24 ॥

नाचिकेताय भगवा-नाह वैवस्वतो यमः ।
मार्कंडेयाय वार्ष्णेय, नाचिकेतोऽभ्यभाषत ॥ 25 ॥

मार्कंडेयान्मया प्राप्तो, नियमेन जनार्दन ।
तवाप्यहममित्रघ्न, स्तवं दद्यां ह्यविश्रुतम् ॥ 26 ॥

स्वर्ग्यमारोग्यमायुष्यं, धन्यं वेदेन सम्मितम् ।
नास्य विघ्नं विकुर्वंति, दानवा यक्षराक्षसाः ।
पिशाचा यातुधाना वा, गुह्यका भुजगा अपि ॥ 27 ॥

यः पठेत शुचिः पार्थ, ब्रह्मचारी जितेंद्रियः ।
अभग्नयोगो वर्षं तु, सोऽश्वमेधफलं लभेत् ॥ 28 ॥

नमः (शु) शिवाभ्यां (न्) नवयौवनाभ्यां (म्) परस्परास्क्लृष्ठ वपुर्धराभ्यां।

नगेन्द्र कन्यां (म्) वृषकेतनाभ्यां(न्), नमो नमः(श) शंकर पार्वतीभ्यां ॥

उमा कान्ताय कान्ताय, सर्वाभीष्ट प्रदायिने

श्रीगिरीशाय देवाय, मल्लिनाथाय मंगलम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अष्टचत्वारिंशोध्यायः।
श्री महादेवसहस्रनामस्त्वं(म्) समाप्तम् ।
श्रीकृष्णार्पणमस्तु ।
श्रीशिवार्पणमस्तु ।